शब्द–ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 जनवरी 2020
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

# अद्वैतसिद्धिग्रन्थस्थद्वितीयमिथ्यात्वलक्षणे विनियुक्तानां हेत्वाभासनिग्रहस्थानानां न्यायशास्त्रदृष्ट्या परिशीलनम्

वाणी मञ्जुनाथ हेगडे
शोधच्छात्रा, विषयः - नव्यन्यायशास्त्रम्
राजीवगान्धिपरिसरः
मेणसे, शृङ्गेरी
चिक्कमगलूर्, कर्नाटक, भारतम्

शोधस्य संक्षेपः

*परमपुरुषार्थभूतमोक्षो हि समूलद्वैतरूपबन्धनिवृत्त्युपलक्षितस्वप्रकाशपरमानन्दलक्षणप्रत्यगभिन्नब्रह्मरूपः, तत्प्राप्तिश्च द्वैताभावोपलक्षितब्रह्मनिर्विकल्पकनिश्चयात् । स च द्वैतसामान्यस्य मिथ्यात्वनिश्चयादेव भवतीति अद्वैतवेदान्तदर्शनसिद्धान्तः। द्वैतमिथ्यात्वं च श्रीमच्छङ्करभगवत्पादप्रभृतयः अद्वैतवेदान्ताचार्याः चतुर्दशशतकपर्यन्तमपि* ***'नेह नानास्ति किंचन' 'मायामात्रमिदं द्वैत*** *मित्यादीनि परश्शतं श्रुतिप्रमाणानि अवलम्ब्य उपपादयन्तः आसन् ।*

*न्यायदर्शने प्रत्यक्षानुमानोपमानशब्दानाम् आप्तशब्दत्वेन श्रुतीनाञ्च प्रामाण्यमस्त्येव। किन्तु अनुमानप्रमाणप्रधानमिदं शास्त्रम् । अत्र यावता विस्तरेण अनुमाननिरूपणं कृतं न तथा अन्यत्र शास्त्रे परिदृश्यते। प्रमाणषट्कवादि वेदान्तदर्शनं तावत् तदन्तर्गततया अनुमानमङ्गीकरोत्येव किन्तु श्रुतिप्रधानमिदं शास्त्रम् । ब्रह्मसत्यं जगन्मिथ्येति अद्वैतवेदान्तसिद्धान्तः। तत्र च श्रुतिरेव परमं प्रमाणम् इत्यङ्गीकुर्वाणाः अपि वेदान्तिनः ग्रन्थेऽस्मिन् अनुमानप्रमाणावलम्बनेन जगन्मिथ्यात्वमुपपादयन्ति। तत्र सदसत्त्वानधिकरणत्वं, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं, ज्ञाननिवर्त्यत्वं, स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं, सद्विविक्तत्वमिति पञ्च मिथ्यात्वनिर्वचनानि प्राचामद्वैतिनामभिमतानि। इमानि न्यायामृतकाराः अदूषयन् ।सिद्धिकारास्तु पञ्चानामपि तेषां मिथ्यात्वनिर्वचनानां निर्दुष्टतां न्यरूपयन् । एवं हेतवोऽपि दृश्यत्व-जडत्व-परिच्छिन्नत्वरूपास्त्रयः न्यायामृतकारैर्दूषिताः समर्थिताश्च सिद्धिकारैः।*[1]

*अद्वैतसिद्धिग्रन्थो यद्यपि अद्वैतवेदान्तसिद्धान्तप्रतिपादको ग्रन्थः तथापि तत्र नव्यन्यायशैली न्यायवेदान्तादि नैकशास्त्रसिद्धान्तप्रक्रियाणां समावेशोऽपि परिदृश्यते। ग्रन्थेऽस्मिन् जगन्मिथ्यात्वस्य साधनाय सिद्धिकर्त्रा, तन्निराकरणाय च पूर्वपक्षिणा शताधिकानाम् अनुमानप्रयोगाणां हेत्वाभासजाति-निग्रहस्थानानादीनां प्रदर्शनं च कृतं वर्तते। हेत्वाभास-जाति-निग्रहस्थानानां निरूपणं न्यायशास्त्रे यावता विस्तरेण कृतं तावता विस्तरेण नान्यत्र कृतम् । तत्रापि हेत्वाभासाः भूयस्या संख्यया (उपशतम्) उपलभ्यन्ते। तत्र पुनः आधिक्येन व्यभिचारः (उपषष्ठि), ततः बाधः (उपदश), सत्प्रतिपक्षः, साध्यवैकल्यं, साधनवैकल्यं, भागासिद्धिः, स्वरूपासिद्धिः, व्याप्यत्वासिद्धिः, आश्रयासिद्धिः च उपलभ्यन्ते। इत्येवं उपशतं हेत्वाभासाः दृश्यन्ते अत्र ग्रन्थे। अद्वैतसिद्धिस्थ द्वितीयमिथ्यात्वलक्षणे हेत्वाभासादीनां न्यायशास्त्रदृष्ट्या परिशीलनम् शोधपत्रेऽस्मिन् कृतं वर्तते। पूर्वोत्तरपक्षेषु प्रदर्शितानां हेत्वाभासनिग्रहस्थानानां लक्षणसमन्वयपुरस्सरं विमर्शः शोधेऽस्मिन् विद्यते। अद्वैतिनां प्रमाणादिव्यवहारविषये कुत्रादरः? तेषां सिद्धान्तः कः? इति उत्कटजिज्ञासायाः शमनं अनेन शोधेन नूनं भविष्यति।*

**मुख्य-शब्दाः :** त्रैकालिकनिषेधप्रतियोगित्वं, मिथ्यात्वं, तात्त्विकं, प्रातिभासिकं, व्यावहारिकं, सिद्धसाधनम्, अर्थान्तरम्

परिचयः

अथैतस्मिन् जगतीतले आब्रह्मस्तम्बपर्यन्तं सर्वेषां जन्तूनां दुःखापगमनार्था सुखसम्पादनार्था च निसर्गत एव जायमाना प्रवृत्तिः दृश्यते। तत्रापि दुःखनिवृत्त्यर्थं जायमाना प्रवृत्तिर्बलवती प्रत्यहं दुःखनिचयैः प्रतिहन्यमानत्वात्। तादृशदुःखस्य निवृत्त्यर्थं सुखादिप्राप्त्यर्थं च उपायं दर्शनेषु स्पष्टीचक्रुः। तादृशदर्शनेषु अन्तर्भवति वेदान्त-न्यायदर्शनञ्च। न्यायदर्शने अनुमानप्रामाण्यपरीक्षोपयोगिनां हेत्वाभासनिग्रहस्थानानां निरूपणं महता विस्तरेण अकारि । "**प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः**" इति न्यायसूत्रे (१.१.१) **हेत्वाभासजातिनिग्रहस्थानानि** निरदिक्षत् सूत्रकारः।

**हेत्वाभासाः - (प्राचीननैयायिकनये) -** गौतममतानुसारं षोडशसु पदार्थेषु अन्यतमो हेत्वाभासः सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीतभेदेन पञ्चविधः। तदुक्तं गौतमसूत्रे '**सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः**' इति।[2] एषः दुष्टहेतूनां विभागः; न तु दोषाणाम्। दोषाणां लक्षणविचारः प्राचीनन्याये न दृश्यते। दर्शितेषु पञ्चसु दुष्टहेतुषु **अनैकान्तिकः सव्यभिचारः**।[3] विपक्षासत्त्वं यस्य नास्ति स सव्यभिचारः। यथा-नित्यः शब्दः अस्पर्शत्वात् इति। **सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः**।[4] यस्य सपक्षसत्त्वं नास्ति स विरुद्धः। **यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः**।[5] यस्य असत्प्रतिपक्षितत्त्वं न वर्तते स सत्प्रतिपक्षः। यथा-शब्दो नित्यः श्रावणत्वात्, शब्दोऽनित्यः कृतकत्वात् इति। **साध्याविशिष्टः साध्यत्वात् साध्यसमः**।[6] पक्षसत्त्वरहितः असिद्धः। यथा-द्रव्यं छाया गतिमत्त्वादिति। साध्येनाविशिष्टः साधनीयत्वात्साध्यसमः। **कालात्ययापदिष्टः कालातीतः**।[7] अयमेव बाधित इत्युच्यते। यस्य अबाधितत्वं नास्ति स बाधितः। यथा- नित्यः शब्दः संयोगव्यङ्ग्यत्वाद् रूपवदिति।

**नव्यनैयायिकनयेहेत्वाभासः**-नव्यन्यायप्रवर्तकेन गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिग्रन्थे "**सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धिबाधाः**" इति पञ्चविधहेत्वाभासाः प्रत्यपादिषत। दोषाणां लक्षणं विभागोऽपि प्रादर्शि। दोषसामान्यलक्षणं तावत् अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वम्[8]। यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वं तत्त्वमिति वा।[9] दोषाः व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधभेदेन पञ्चधा। तत्र व्यभिचारः साधारण्यासाधारण्यानुपसंहारित्वभेदेन त्रिविधः। असिद्धिः त्रिविधा-आश्रयासिद्धि-स्वरूपासिद्धि-व्याप्यत्वासिद्धिभेदेन।

**निग्रहस्थानम्-विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्**।[10] तल्लक्षणं च उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गत्वम्। प्रतिज्ञाहान्याद्यन्यतमत्वं वा इत्यपि वदन्ति। वादिनिष्ठपराजयसम्पादकत्वं निग्रहस्थानसामान्यलक्षणमित्यर्थः।[11] वादिनोऽपजयहेतुः निग्रहस्थानम्।[12] प्रतिज्ञाहानिः, प्रतिज्ञान्तरम्, प्रतिज्ञाविरोधः, प्रतिज्ञासंन्यासः, हेत्वन्तरम्, अर्थान्तरम्, निरर्थकम्, अविज्ञातार्थम्, अपार्थकम्, अप्राप्तकालम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्यनुयोज्योपेक्षणम्, निरनुयोज्यानुयोगः, अपसिद्धान्तः हेत्वाभासश्चेति[13] निग्रहस्थानानि द्वाविंशतिधा।

**शोधस्य प्रकृतिः -** शोधप्रबन्धेऽस्मिन् मया अद्वैतसिद्धिग्रन्थस्थ द्वितीयमिथ्यात्वलक्षणे विनियुक्तानां हेत्वाभासनिग्रहस्थानानां न्यायशास्त्रदृष्ट्या परिशीलनं क्रियते। अनेन अद्वैतसिद्धिग्रन्थे निगूढः

नव्यन्यायस्य प्रभावो आविष्क्रियते। किञ्च एतेन वेदान्तदर्शनस्य न्यायदर्शनस्य च परस्परसम्बन्धः विचार्यते। करिष्यमाणस्य शोधस्य प्रकृतिः एषा भविष्यति। आदौ-

- द्वितीयमिथ्यात्वलक्षणे हेत्वाभासानां निग्रहस्थानानां च अन्वेषणं सङ्कलनञ्च।
- सङ्कलितहेत्वाभास-निग्रहस्थानानां न्यायशास्त्रोक्तहेत्वाभास-निग्रहस्थानलक्षणावलम्बनेन परीक्षणम्।
- सङ्कलिताहेत्वाभास-निग्रहस्थानानां मीमांसाकादिमतान्तरावलम्बनमस्ति न वेति विचारणं, लक्षणसमन्वयप्रदर्शनञ्च।

**शोधस्य उद्देश्यम्** - द्वितीयमिथ्यात्वलक्षणे विनियुक्तानां हेत्वाभासनिग्रहस्थानानां न्यायशास्त्रदृष्ट्या परिशीलनं शोधस्य पत्रस्य अस्य मुख्यम् उद्देश्यम् अस्ति।

**शोधपत्रस्य उपयोगिता** -

- हेत्वाभासनिग्रहस्थानानां विस्तृतं निरूपणं न्यायशास्त्रादन्यत्र न कृतम्।[14] न्यायेऽपि एषामुदाहरणम् उपयोगश्च अल्पतयैव उपलभ्यते। अस्मिन् शोधे द्वितीयमिथ्यात्वलक्षणे विनियुक्तानां हेत्वाभासनिग्रहस्थानानां सङ्कलनम् अन्वेषणं निरूपणं च करिष्यते इत्यतः तेन हेत्वाभासनिग्रहस्थानानां विपुलानि उदाहरणानि समुपलभ्यन्ते, न्यायशास्त्रस्य विकासे योगदानं भविष्यति।
- हेत्वाभासादीनाम् शास्त्रे लोके च न्यायालयादौ उपयोगक्रमपरिज्ञानं सर्वे शास्त्राध्येतारः अन्ये जिज्ञासवश्च अनेन शोधग्रन्थेन प्राप्तुं शक्ष्यन्ति।

**शोधपत्रस्य मुख्यं विषयवस्तु -**

**अद्वैतसिद्धिग्रन्थस्थद्वितीयमिथ्यात्वलक्षणे विनियुक्तानां हेत्वाभासनिग्रहस्थानानां न्यायशास्त्रदृष्ट्या परिशीलनम्**

**'नेह नानास्ति किञ्चन'**[15] इति श्रुत्यर्थमादाय विवरणाचार्यैः **'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्व'मिति** मिथ्यात्वलक्षणं प्रत्यपादि। अत्र प्रतिपन्नत्वम् उपाधेर्विशेषणम्। उप समीपे आधीयतेऽस्मिन्निति उपाधि इति व्युत्पत्त्या अधिकरणार्थकमुपाधिपदम्। प्रतिपन्ने इत्यस्य स्वप्रकारकप्रतीतिविशेष्ये इत्यर्थो ग्राह्यः। अत्र स्वपदं मिथ्यात्वेनाभिमतपरम्। तथा च स्वप्रकारकधीविशेष्यताव्यापकीभूतो यो अत्यन्ताभावः नासीत् नास्ति न भविष्यतीति सर्वदा विद्यमानः यः निषेधः अर्थात् अत्यन्ताभावः तस्य प्रतियोगित्वमेव मिथ्यात्वमिति फलितम्। यथा रजतप्रकारकज्ञानविशेष्यतावद् शुक्तिनिष्ठः यः त्रैकालिकनिषेधः 'रजतं नासीत् नास्ति न भविष्यतीति अत्यन्ताभावात्मकः तस्य प्रतियोगित्वं रजते अस्तीति रजतस्य मिथ्यात्वम्।

**पूर्वपक्षः-**

**विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्तिरूप्यवत्।**

**प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम् (प्रकाशात्मयतिः-विवरणम्)**




1.विमतं मिथ्या (प्रतिपन्नोपाधौ त्रैकालिकनिषेध(तात्त्विकः)प्रतियोगित्वं मिथ्यात्वं) दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात्, शुक्तिरूप्यत्वात् ।ननु प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य तात्त्विकत्वेऽद्वैतहानिः।[16]

**पूर्वपक्षः-** मिथ्यात्वलक्षणघटकतया यः त्रैकालिकनिषेधः उक्तः सः तात्त्विको वा, प्रातिभासिको वा, व्यावहारिको वा इति। विकल्पत्रयेऽपि पूर्वोक्तनिषेधः न सङ्गच्छते। यतः ब्रह्मणि प्रपञ्चनिषेधस्य तात्त्विकत्वाङ्गीकारे अद्वैतहानिः स्यात् । ब्रह्मप्रपञ्चनिषेधयोः उभयोरपि तात्त्विकत्वेन पारमार्थिकवस्तुद्वयसद्भावात् एकमेवाद्वितीयं ब्रह्म इति अद्वैतसिद्धान्तः भज्येत।

**विमर्शः-** सिद्धान्तविपरीताभ्युपगमोऽपसिद्धान्तः-**अपसिद्धान्तः**[17]। यः कञ्चन प्रथमं सिद्धान्तमभ्युपगम्य कथामुपक्रमते कथाप्रसङ्गाच्च सिषाधयिषितार्थसमर्थने रभसेन दूषणोद्धरणाश्रद्धया वा सिद्धान्तविरुद्धमभिधत्ते सोऽपसिद्धान्तेन पराजीयते।[18] इति नैयायिकैरुक्तत्वात् अपसिद्धान्तरूपनिग्रहस्थानमत्र सम्भवति।

**समाधानम्- (सिद्धान्तः)** प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य तात्विकत्वमङ्गीकृत्य समाधानं कथयति सिद्धान्ती - पूर्वपक्षिणा त्रैकालिकनिषेधस्य तात्विकत्वे अद्वैतहानिरिति यदुक्तं तन्न यतः अभावस्य अधिकरणस्वरूपत्वात् ब्रह्मणि विद्यमानः यः प्रपञ्चात्यन्ताभावः सः ब्रह्मस्वरूप एव तथा च त्रैकालिकनिषेधस्य ब्रह्माभिन्नत्वात् ब्रह्मातिरिक्ततात्विकवस्तुनः असत्वेन न अद्वैतहानिः।

**पूर्वपक्षः-** प्रकारान्तरेण अद्वैतहानि शङ्कते पूर्वपक्षी तथाहि - प्रपञ्चः तात्त्विकः, तात्त्विकाभावनिरूपितत्वात्, यः यत्सत्ताकाभावप्रतियोगि सः तत्सत्ताकः इत्यभिसन्धाय माध्वः शङ्कते - पारमार्थिकत्रैकालिकनिषेधप्रतियोगिनः प्रपञ्चस्य पारमार्थिकत्वापत्तिः। तथा च ब्रह्मभिन्नप्रपञ्चस्यापि पारमार्थिकत्वेन पारमार्थिकवस्तुद्वयाङ्गीकाराद् पुनरपि ब्रह्माद्वैतसिद्धान्तहानिः इति।

**समाधानम्-**यः यत्सत्ताकाभावप्रतियोगि सः तत्सत्ताकः इति पूर्वपक्षिप्रदर्शितव्याप्तौ व्यभिचारेण निषेधस्य तात्त्विकत्वेऽपि न प्रतियोगिनः तात्त्विकत्वापत्तिः इत्यभिसन्धायाह सिद्धान्ती- प्रातिभासिकशुक्तिरजताद्यपेक्षयाऽधिकसत्त्वाकस्य शुक्तिरजताद्यभावस्य अथवा व्यावहारिकस्य वा प्रतियोगिनि शुक्तिरजते प्रदर्शितायाः यः यत्सत्ताकाभावप्रतियोगि सः तत्सत्ताकः इति व्याप्तेः व्यभिचारात् । तात्त्विकाभावनिरूपितस्य शुक्तिरजतादेः तात्त्विकत्वाभावेन प्रदर्शितायाः व्याप्तेः व्यभिचारः इत्थं एतां व्याप्तिमादाय अद्वैतहानिः आशङ्किता सा न सङ्गच्छते।

2.विमतं मिथ्या (प्रतिपन्नोपाधौ त्रैकालिकनिषेध(व्यावहारिकः)प्रतियोगित्वं मिथ्यात्वं) दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात्, शुक्तिरूप्यत्वात्। प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य व्यावहारिकत्वेऽपि तस्य बाध्यत्वेन तात्विकसत्त्वाविरोधितया अर्थान्तरम्।[19]

**पूर्वपक्षः-** मिथ्यात्वलक्षणघटकतया यः त्रैकालिकनिषेधः उक्तः सः तात्त्विको वा, प्रातिभासिको वा, व्यावहारिको वा इति विकल्पत्रयम्। विकल्पत्रयेऽपि उक्तनिषेधः न सङ्गच्छते। प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य व्यावहारिकत्वे निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वाविरोधित्वे तन्त्रम्(प्रयोजकम्) इति नियमानुसारं प्रतिपन्नोपाधौ निषेधस्य व्यावहारिकत्वे ब्रह्मप्रमाबाध्यत्वेन बाध्यनिषेधप्रतियोगिनः प्रपञ्चस्य पारमार्थिकत्वस्यापि सम्भवात् **अर्थान्तरं** स्यात्।

**विमर्शः-**प्रकृतादर्थादप्रतिसम्बद्धार्थम् अर्थान्तरम्।[20] प्रकृतानुपयुक्तार्थाभिधानम्। अभ्युपगतार्थासङ्गतत्वात् निग्रहस्थानम्। यदभ्युपगतं तत्संबद्धमन्यदसंबद्धमुच्यत इति।[21] नैयायिकैरुक्त-अर्थान्तरलक्षणस्य प्रकृते समन्वयनात् नैयायिकमताभिमतमेव अर्थान्तररूपनिग्रहस्थानमङ्गीकृतमिति निर्णेतुं शक्यते। प्रकृते अनुपयुक्तस्य प्रपञ्चपारिमार्थिकत्वस्य अभिधानात्।

**सिद्धान्तः-** निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वाविरोधित्वे तन्त्रम् (प्रयोजकम्-व्याप्यम्) इति नियमस्य स्वाप्नगजस्थले **व्यभिचारः**। 'नायं गजः' इति स्वाप्नगजनिषेधस्य प्रातिभासिकत्वेऽपि व्यावहारिकत्वेऽपि वा तस्य निषेधस्य बाध्यत्वमस्ति। किन्तु तत्प्रतियोगिनः स्वाप्नगजस्य पारमार्थिकसत्त्वाविरोधित्वं नास्तीति (पारमार्थिकत्त्वं तु नास्तीत्यर्थः) **व्यभिचारः**। यत्र यत्र निषेधस्य बाध्यत्वं तत्र तन्निषेधप्रतियोगिनः पारमार्थिकसत्त्वाविरोधित्वमिति व्याप्तेः स्वाप्नार्थस्य स्वाप्ननिषेधे व्यभिचारात् निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वाविरोधित्वे न प्रयोजकम् अपि तु प्रतियोग्य (निषेध्य) पेक्षया न्यूनसत्त्वाकत्वं निषेधस्य पारमार्थिकसत्त्वाविरोधित्वे प्रयोजनकम्। प्रकृते च यदि प्रतिपन्नोपाधौ त्रैकालिकनिषेधः प्रतियोगिप्रपञ्चापेक्षया न्यूनसत्ताको भवेत्, व्यावहारिकप्रतियोगिनः प्रपञ्चस्य निषेधः प्रातिभासिको भवेत्, तर्हि प्रतियोगिना सह निषेधस्य विरोधाभावात् प्रातिभासिकेन निषेधेन प्रतियोगिनः प्रपञ्चस्य मिथ्यात्वं न लभ्येत, मिथ्यात्वस्य अलाभे अर्थान्तरत्वं स्यात्। किन्तु अत्र प्रतिपन्नोपाधौ त्रैकालिको निषेधः प्रातिभासिक इति न ब्रूमः, परन्तु प्रतियोगिसमानसत्ताको व्यावहारिक इति ब्रूमः। तथा च निषेध्यापेक्षया निषेधस्य न्यूनसत्ताकत्वाभावादेव न अर्थान्तरतायाः अवकाशः इति दर्शयन्नाह - त्रैकालिकनिषेधतत्प्रतियोगिनोः स्वाप्नार्थतन्निषेधयोश्च तुल्यासत्ताकत्वात् त्रैकालिक प्रपञ्चनिषेधस्वाप्नार्थाभावयोः गतस्य निषेध्यसत्ताकत्वस्य स्वप्रतियोगिगतपारमार्थिकत्वविरोधित्वमस्त्येवेति नार्थान्तरम्।

**पूर्वपक्षः-**मिथ्यात्वघटकव्यावहारिकत्रैकालिकनिषेधस्य प्रकृतानुमानेन अत्यन्ताभावबोधने व्यावहारिकनिषेधापेक्षया तत्प्रतियोगिनः प्रपञ्चस्य अधिकसत्त्वस्यापत्तिः। प्रतियोग्य(निषेध्य)पेक्षया न्यूनसत्त्वाकत्वं निषेधस्य पारमार्थिकसत्त्वाविरोधित्वे प्रयोजनकमिति नियमानुसारं व्यावहारिकनिषेधापेक्षया अधिकसत्ताकत्वात् प्रतियोगिनः प्रपञ्चस्य पारमार्थिकत्वापत्त्या पुनरपि अर्थान्तरम्।

3.विमतं मिथ्या (प्रतिपन्नोपाधौ त्रैकालिकनिषेध (तात्त्विकः) प्रतियोगित्वं मिथ्यात्वं) दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात्, शुक्तिरूप्यत्वात्। न च तात्त्विकाभावप्रतियोगिनः प्रपञ्चस्य तात्विकत्वापत्तिः,

शब्द-ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 जनवरी 2020
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

तात्त्विकाभावप्रतियोगिनः प्रपञ्चस्य तात्त्विकत्वापत्तिः, तात्त्विकाभावप्रतियोगिनि शुक्तिरजतादौ कल्पिते व्यभिचारात् ।[22]

मिथ्यात्वलक्षणघटकतया यः त्रैकालिकनिषेधः उक्तः सः तात्त्विको वा, प्रातिभासिको वा, व्यावहारिको वा इति विकल्पत्रयमुक्त्वा, विकल्पत्रयेऽपि उक्तनिषेधः न सङ्गच्छते इति पूर्वपक्षिणा उक्तम् । किन्तु अधुना कथयति सिद्धान्ती मिथ्यात्वलक्षणघटकतया यः त्रैकालिकनिषेधः उक्तः सः न प्रातिभासिकः अपि तु पारमार्थिकः(तात्त्विकः) व्यावहारिकश्च भवितुमर्हतीति। तत्र पुनः **पूर्वपक्षः-** यदि प्रपञ्चः तात्त्विकः तर्हि प्रपञ्चः अपि तात्त्विकः एव स्यात् यत् यन्निरूप्यं तत् तत्समानसत्ताकम् इति व्याप्तिबलात् **अर्थान्तर**दोषः। **समाधानम्-** शुक्तौ रजतम् अवभासते। रजतस्य प्रातिभासिकसत्ता। 'इदं न रजतम्' इति रजतनिषेधस्य व्यावहारिकता। निषेध्यनिषेधयोः समानसत्ता भवितव्या इति नास्ति। इत्थं च तात्त्विकाभावनिरूपितस्य शुक्तिरजतादेः तात्त्विकत्वाभावेन प्रदर्शितायाः व्याप्तेः **व्यभिचारः**।

**विमर्शः-** व्यभिचारलक्षणं च साध्यसाधनग्रहविरोधिनो ज्ञानस्य विषयतया व्याप्तिग्रहप्रतिबन्धकतानतिरिक्तवृत्तित्वम् ।[23] इति दीधितिकथनानुसारं प्रकृते च तात्त्विकाभावनिरूपितस्य शुक्तिरजतादेः तात्त्विकत्वाभावेन यत् यन्निरूप्यं तत् तत्समानसत्ताकम् इतिव्याप्तिग्रहप्रतिबन्धात् व्यभिचारः। अतः नैयायिकसम्मतः व्यभिचारः अत्र अङ्गीकृतः।

4 विमतं मिथ्या (प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं(स्वरूपेण) मिथ्यात्वं) दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात्, शुक्तिरूप्यत्वात् । ननु एतन्निषेधप्रतियोगित्वं किं स्वरूपेण, उतासद्विलक्षणस्वरूपानुपमर्दन पारमार्थिकत्वाकारेण वा। नाद्य, श्रुत्यादिसिद्धोत्पत्तिकस्यार्थक्रियासमर्थस्याविद्योपादानकस्य तत्त्वज्ञाननाश्यस्य च वियदादेः रूप्यादेश्च धीकालविद्यमानेनासद्विलक्षणस्वरूपेण त्रैकालिकनिषेधायोगात् ।[24]

**पूर्वपक्षः-** प्रपञ्चः प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी (मिथ्या) दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् इत्यत्र त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम्। प्रपञ्चः कालत्रयेऽपि न भवति अतः मिथ्या इत्यर्थः। तथा च प्रपञ्चः त्रैकालिकनिषेधस्य प्रतियोगी। प्रपञ्चस्य निषेधप्रतियोगित्वं स्वरूपेण इति स्वीकारे पक्षीभूतप्रपञ्चस्य वियदादेः त्रैकालिकनिषेधप्रतियोगित्वं स्वरूपेण भवितुं नार्हतीति (साध्याभाववत्पक्षः) **बाधः**। पक्षीभूतप्रपञ्चे त्रैकालिकनिषेधप्रतियोगित्वं दृश्यत्वरूपसामान्यधर्मेण आकाशत्वादिरूपविशेषधर्मेण वा भवितुं नार्हतीत्यतः बाधः। आकाशत्वेन रूपेण आकाशस्य उत्पत्तिं श्रुतिरेव कथयतीत्यतः आकाशत्वरूपविशेषधर्मण त्रैकालिकनिषेधः पक्षीभूताकाशस्य न सम्भवति। आकाशे शब्दोत्पत्तिरूपार्थक्रियाकारित्वस्य सत्त्वात् आकाशत्वेन रूपेण त्रैकालिकनिषेधः वक्तुं न शक्यते।

**विमर्शः-** साध्याभाववान् साध्यवदन्यो वा पक्षःपक्षावृत्तिसाध्यं पक्षे साध्याभाव; पक्षनिष्ठसाध्याभाववत्त्वादिकं साध्यादेः पक्षावृत्तित्वादिकं साध्यवत्सामान्यादेः पक्षान्यत्वादिकं, विशिष्टसाध्ये पक्षादेर्विशेष्याभाववत्त्वादिकं, यथामतं पक्षे साध्यवत्ताज्ञानस्य साक्षाद्विरोधिप्रत्येकं वा बाधः।[25] पक्षीभूतप्रपञ्चस्य वियदादेः त्रैकालिकनिषेधप्रतियोगित्वं स्वरूपेण भवितुं नार्हतीति (साध्याभाववत्पक्षः) **बाधः**।

**पूर्वपक्षः-**

**विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्तिरूप्यवत् ।**

**प्रतिपन्नोपाधौ <u>त्रैकालिकनिषेधप्रतियोगित्वम्</u> (प्रकाशात्मयतिः-विवरणम्)**




5. विमतं मिथ्या (प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं (स्वरूपेण) मिथ्यात्वं) दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात्, शुक्तिरूप्यत्वात्। ननु एतन्निषेधप्रतियोगित्वं किं स्वरूपेण, उतासद्विलक्षणस्वरूपानुपमर्दने पारमार्थिकत्वाकारेण वा। पारमार्थिकत्वस्यापि स्वरूपेण निषेधे प्रथमपक्षोक्तदोषापत्तिः।[26]

**पूर्वपक्षः-** पक्षीभूतप्रपञ्चस्य वियदादेः त्रैकालिकनिषेधप्रतियोगित्वं स्वरूपेण भवितुं नार्हतीति (साध्याभाववत्पक्षः) **बाधः**। पक्षीभूतप्रपञ्चे त्रैकालिकनिषेधप्रतियोगित्वं दृश्यत्वरूपसामान्यधर्मेण आकाशत्वादिरूपविशेषधर्मेण वा भवितुं नार्हतीत्यतः बाधः। आकाशत्वेन रूपेण आकाशस्य उत्पत्तिं श्रुतिरेव कथयतीत्यतः आकाशत्वरूपविशेषधर्मेण त्रैकालिकनिषेधः पक्षीभूताकाशस्य न सम्भवति। आकाशे शब्दोत्पत्तिरूपार्थक्रियाकारित्वस्य सत्त्वात् आकाशत्वेन रूपेण त्रैकालिकनिषेधः वक्तुं न शक्यते। शुक्तिरूप्यं प्रपञ्चो वा तत्त्वसाक्षात्कारपर्यन्तं तिष्ठति। ततः परं नश्यतीत्यतः कदापि नासीत् प्रपञ्चः इति त्रैकालिकनिषेधः तस्य न शक्यते। आकाशादौ विद्यमानं दृश्यत्वं आकाशत्वं वा भवतु तत् असद्विलक्षणमित्यतः तस्य किञ्चित् स्वरूपं भवत्येव। असतः तुच्छस्य शशविषाणादेः स्वरूपं नास्ति। असद्विलक्षणदृश्यत्वाकाशत्वादिरूपेण आकाशादिकमस्ति अतः तेन दृश्यत्वाकाशत्वादिरूपेण तस्य निषेधः कर्तुं न शक्यते।

**निष्कर्षः**

द्वितीयमिथ्यात्वलक्षणेऽस्मिन् हेत्वाभासद्वयं निग्रहस्थानद्वयं च सङ्कलितं मया। तथा च हेत्वाभासद्वयस्य निग्रहस्थानद्वयस्य च समन्वयपुरस्सरं व्याख्यानं पूर्वोत्तरपक्षद्वारा कृतम्। अद्वैतवेदान्तिनः प्रमाणादिव्यवहारविषये भाट्टनयमनुसरन्तीति प्रसिद्धिः। अत्र मिथ्यात्वद्वितीयलक्षणे तावत् हेत्वाभासविषये निग्रहस्थानविषये च मीमांसानयं परित्यज्य न्यायनयः अनुसृतो दृश्यते। अनुमानञ्च 'विमतं सत्त्वरहितत्वे सति असत्त्वरहितत्वे सति सत्त्वासत्त्वरहितम्, बाध्यत्वाद्दोषप्रयुक्तभानत्वाद्वा, यन्नैवं तन्नैवं यथा ब्रह्म'। सत्वरहितस्य प्रपञ्चस्य सद्रूपत्वेन मानाभावेन बाधात्[27]। मीमांसकैः बाधः

शब्द-ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 जनवरी 2020
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

पृथक्हेत्वाभासः इति नाङ्गीक्रियते। बाधः बाधितविशेषणे पक्षाभासे अन्तर्भवति। बाधः बाधितविशेषणे पक्षाभासे अन्तर्भवति।[28] अतः अद्वैतसिद्धिग्रन्थेऽस्मिन् प्रमाणादिव्यवहारविषये हेत्वाभासनिग्रहस्थानादिविषये च नव्यन्यायशैली अनुसृता अस्तीति निर्णेतुं शक्यते। अनेन अभिनवं किञ्चन चिन्तनम् शास्त्राध्येतारः प्राप्स्यन्ति इति विश्वसीमि।

सन्दर्भ ग्रन्थ सूचिः

*1 एवमेव अद्वैतसिद्धिग्रन्थे न्याययुक्त्युपयोगः त्रेधा दृश्यतेद्वैतिमतनिराकरणाय अद्वैतमतपरिष्करणाय क्वचिद्विशिष्य नैयायिकमतसिद्धार्थनिराकरणाय च। एवं सिद्धान्तबिन्द्वादौ स्वीयग्रन्थान्तरेष्वपि क्वचित् न्यायमतनिराकरणं दृष्टं मधुसूदनसरस्वतीनाम् । यद्यपि मधुसूदनसरस्वत्यपेक्षया प्रागपि खण्डनकारैर्न्यायमतं निराकृतं, तथापि तदुदयनादि-प्राचीनन्यायमतसिद्धमेव। एतैस्तु नव्यन्यायसम्मताः तद्व्यवस्थापिताश्चाप्यर्थाः केचन निराकृता इति विशेषः।*

*2 डा.महेश झा (सम्पादकः), न्यायसूत्रम् २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- १२२, सूत्रसंख्या- १.२.४*

*3 डा.महेश झा (सम्पादकः), न्यायसूत्रम् २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- १२३, सूत्रसंख्या- १.२.५*

*4 डा.महेश झा (सम्पादकः), न्यायसूत्रम् २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- १२४, सूत्रसंख्या-१.२.६*

*5 डा.महेश झा (सम्पादकः), न्यायसूत्रम् २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- १२६, सूत्रसंख्या- १.२.७*

*6 डा.महेश झा (सम्पादकः), न्यायसूत्रम् २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- १२७, सूत्रसंख्या-१.२.८*

*7 डा.महेश झा (सम्पादकः), न्यायसूत्रम् २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- १२९, सूत्रसंख्या- १.२.९*

*8 श्रीकृष्णवल्लभाचार्यः (सम्पादकः), तर्कसङ्ग्रहः(दीपिकाव्याख्योपेतः) , १९९७, चौखम्बा विद्याभवन, वाराणसी, पृष्ठ संख्या-११२*

*9 गङ्गेशोपाध्यायः(लेखकः),तत्त्वचिन्तामणिहेत्वाभाससामान्यनिरुक्तिः, १९९९, राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः, पृष्ठसंख्या१७८*

*10 डा.महेश झा (सम्पादकः), न्यायसूत्रम्, २०१३, चौखम्बा संस्कृतसीरिज आफिस, वारणासी, पृष्ठसंख्या- १४१, सूत्रसंख्या- १.२.१९*

*11 श्रीकुरुगण्टि श्रीरामशास्त्री (सम्पादकः), तर्कसङ्ग्रहदिपीकासर्वस्वम् २०१२, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः, पृष्ठसंख्या२०६*

*12 श्रीकृष्णवल्लभाचार्यः (सम्पादकः), तर्कसङ्ग्रहः(दीपिकाव्याख्योपेतः) , १९९७, चौखम्बा विद्याभवन, वाराणसी, पृष्ठ संख्या-४५*

*13 डा.महेश झा (सम्पादकः), न्यायसूत्रम्, २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- ६५५, सूत्रसंख्या- ५.२.१*

*14 श्रीशीतांशुशेखरदेवशर्मः (सम्पादकः), योगेन्द्रनाथदेवशर्मः (व्याख्याता), अद्वैतसिद्धिः(बालबोधिनीव्याख्ययोद्भासिता-मिथ्यात्वनिरूपणे द्वितीयलक्षणम्-पूर्वपक्षः-१.परिच्छेदः), २०००, रत्ना पब्लिकेशन्स, वाराणसी, प्रथमः भागः, पृष्ठसंख्या५५*

*15 अनन्तलालठक्कुरः(सम्पादकः), उदयनाचार्यः (लेखकः), न्यायवार्तिकतात्पर्यटीकापरिशुद्धिः; १९९६, सूत्रसंख्या५.२.१३ पृष्ठसंख्या६००*

*16 जयन्तभट्टः (लेखकः), न्यायमञ्जरी,१९८४, सम्पूर्णानन्दसंस्कृतविद्यालयः; वाराणसी, पृष्ठसंख्या१९९*

शब्द–ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 जनवरी 2020
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

17 श्रीशीतांशुशेखरदेवशर्मः (सम्पादकः), योगेन्द्रनाथदेवशर्मः (व्याख्याता), अद्वैतसिद्धिः(बालबोधिनीव्याख्ययोद्भासिता-मिथ्यात्वनिरूपणे द्वितीयलक्षणम्-पूर्वपक्षः॰१.परिच्छेदः), २०००, रत्ना पब्लिकेशन्स, वाराणसी, प्रथमः भागः, पृष्ठसंख्या॰७६

18 डा.महेश झा (सम्पादकः), न्यायसूत्रम्, २०१३, चौखम्बा संस्कृतसीरिज आफिस, वाराणासी, पृष्ठसंख्या- ६६२, सूत्रसंख्या॰ ५.२.७

19 भारद्वाजोद्द्योतकरः(लेखकः) अनन्तलालठाकूर् (सम्पादकः), न्यायभाष्यवार्तिकम्, १९९७, भारतीयदार्शनिकानुसन्धानपरिषद्, न्यूदिल्ली, पृष्ठसंख्या॰५२३, सूत्रसंख्या॰५.२.७

20 श्रीशीतांशुशेखरदेवशर्मः (सम्पादकः), योगेन्द्रनाथदेवशर्मः (व्याख्याता), अद्वैतसिद्धिः(बालबोधिनीव्याख्ययोद्भासिता-मिथ्यात्वनिरूपणे द्वितीयलक्षणम्-सिद्धान्तपक्षः-१.परिच्छेदः), २०००, रत्ना पब्लिकेशन्स, वाराणसी, प्रथमः भागः, पृष्ठसंख्या॰७८

21 गङ्गेशोपाध्यायः(लेखकः), तत्त्वचिन्तामणि (दीधितिव्याख्योपेता-अनुमानकाण्डान्तः भागः), १९९९, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, पृष्ठसंख्या॰१७१३

22 श्रीशीतांशुशेखरदेवशर्मः (सम्पादकः), योगेन्द्रनाथदेवशर्मः (व्याख्याता), अद्वैतसिद्धिः(बालबोधिनीव्याख्ययोद्भासिता-मिथ्यात्वनिरूपणे द्वितीयलक्षणम्-पूर्वपक्षः॰१.परिच्छेदः), २०००, रत्ना पब्लिकेशन्स, वाराणसी, प्रथमः भागः, पृष्ठसंख्या॰७४

23 गङ्गेशोपाध्यायः(लेखकः), तत्त्वचिन्तामणि (दीधितिव्याख्योपेता-अनुमानकाण्डान्तः भागः), १९९९, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, पृष्ठसंख्या॰१८८५

24 श्रीशीतांशुशेखरदेवशर्मः (सम्पादकः), योगेन्द्रनाथदेवशर्मः (व्याख्याता), अद्वैतसिद्धिः(बालबोधिनीव्याख्ययोद्भासिता-मिथ्यात्वनिरूपणे द्वितीयलक्षणम्-पूर्वपक्षः॰१.परिच्छेदः), २०००, रत्ना पब्लिकेशन्स, वाराणसी, प्रथमः भागः, पृष्ठसंख्या॰७६-७७

25 श्रीरामेश्वरदत्तशर्मः(व्याख्यातः), अद्वैतसिद्धिः-(सरलाख्यहिन्दीव्याख्यया सहिता- अविद्यानि॰,प्रत्यक्षानुमानप्र॰), २००४, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, पृष्ठसंख्या॰५६६

26 नारायणद्वयी(लेखकः), मानमेयोदयः, २०१३, विजयरानी परिमला पब्लिकेशन्स, दिल्ली ९१, पृष्ठसंख्या॰ ८७